भारत-स्वातन्त्र्य-स्वर्णजयन्ती-ग्रन्थमाला-12

# पुरन्ध्रीपञ्चकम्



वेदकुमारी घई

राष्ट्रिय-संस्कृत-संस्थानम्

# प्राक्कथनम्

*योऽनूचानस्स नो महान्* इत्युद्दिश्य संस्कृतसंरक्षणसंवर्धनप्रचारप्रसारात्मकं स्वोद्देश्यं साधु निर्वहदिदं **राष्ट्रियसंस्कृतसंस्थानं** भारतस्वातन्त्र्यस्वर्णजयन्तीं विविधैश्शैक्षिककार्यक्रमैरायोजयदिति विज्ञाय समेषां विदुषां संस्कृतानुरागिणां च मनांस्यवश्यं मोमुद्येरन् ।

प्राचीनशास्त्राणां संरक्षणे, संवर्धने, संस्कृताध्ययनपरम्पराया राष्ट्रियैकात्मतासंवर्धनशक्तेश्च प्रचारार्थं संस्थानेनानेन निरन्तरं विहितं सत्प्रयत्नं योगदानं च विद्वत्समवायस्सर्वथाभिनन्दतीति विश्वस्यते ।

भारतस्वातन्त्र्यस्वर्णजयन्तीमभिलक्ष्य प्रवर्तितायां योजनायां राष्ट्रस्यास्य विभिन्नेषु प्रान्तेषु विद्योतमानैर्विद्वत्तल्लजैः नानाशास्त्राणि । तत्र निहितानि वैज्ञानिकतत्त्वानि चाधिकृत्य विरचितानि ग्रन्थकुसुमानि सादरं सञ्चित्य सङ्ग्रथ्य च **भारत-स्वातन्त्र्य-स्वर्णजयन्ती-ग्रन्थमालात्वेन** तत्रभवतां समक्षमुपस्थाप्य महानानन्दस्सन्तोषश्चोप- जायेते ।

तत्रेदं **पुरन्ध्रीपञ्चकम्** इति ग्रन्थरत्नं राष्ट्रपतिसम्मानपुरस्कृताभिः जम्मूविश्वविद्यालयस्य संस्कृतविभागाध्यक्षचराभिः **डॉ० वेदकुमारी-घई** महोदयाभिः प्रणीतम् । रूपकपञ्चकेऽस्मिन् मेनकाद्रौपदीमदालसासुगन्धा-विलीनानां पञ्चपुरन्ध्रीणां विशिष्टं चरित्रम् अद्यतनीयसामाजिकसमस्यासमाधान-दृष्ट्या रोचकप्रासादिकशैल्या चित्रितम् । एतानि रूपकरत्नानि संस्थानस्य **भारत- स्वातन्त्र्य-स्वर्ण-जयन्ती-ग्रन्थमालायां** प्रस्तुतवतीभ्यः डॉ० घईमहोदयाभ्यः वयं हार्दिकं कार्तज्ञ्यं ज्ञापयामः ।

भारतस्वातन्त्र्यस्वर्णजयन्तीसमारोहाङ्गत्वेन संस्थानेन आयोजितेषु विविधशैक्षिकानुष्ठानेषु, विशेषतो ग्रन्थमालायाः आयोजनप्रकाशनादिकार्येषु

# पुरन्ध्रीपञ्चकम्

| | | |
|---|---|---|
| | पुरोवाक् | iii |
| | अवतरणिका | v |
| १. | मेनकावात्सल्यम् | १ |
| २. | अपूर्वः प्रतिशोधः | १७ |
| ३. | मदालसा | ३१ |
| ४. | सुगन्धा | ५३ |
| ५. | द्राक्षामतः शकुन्तला | ७३ |

**सानुमती**—अथ किम्।

## पञ्चमं दृश्यम्

**मेनका**—शकुन्तलाया वार्तां प्राप्य सानुमती अद्यावधि नहि आगता। तां प्रतीक्षमाणा दिनानि, वर्षाणि इव यापयामि। (द्वारि खट् खट् इति ध्वनिः श्रूयते) सम्भाव्यते आगता सैव। सानुमति ! आगम्यताम्।

**शारद्वतः**—अहमस्मि महर्षेः कण्वस्य शिष्यः भगिनीशकुन्तलायाः सहपाठी शारद्वतो नाम ब्रह्मचारी।

**मेनका**—आगम्यताम् उपविशतु अत्रभवान् अस्मिन् आसने। किं शकुन्तलायाः शिक्षाकालः सम्पूर्णः जातः ? महर्षिणा कः सन्देशः मह्यं प्रेषितः ? किं तस्या विवाहस्य मङ्गलावसरः समुपस्थितः यत्र अहमपि निमन्त्रिता ?

**शारद्वतः**—मातः ! अहं तु भवत्याः सख्या सानुमत्या भवत्सकाशं प्रेषितःअस्मि। सा तु शकुन्तलां नीत्वा मारीचाश्रमं गता। भवती अपि तत्र आहूता विशेष-कार्याय।

**मेनका**—शकुन्तलायाः का वार्ता ?

**शारद्वतः**—अनभिधेयं कथयितुं न शक्यते।

**मेनका**—विपद्गता मे दुहिता इति स्पष्टम्। मुनिवर ! पाषाणहृदया अहं सर्वं श्रोतुमीहे।

**शारद्वतः**—श्रूयताम्। कतिपयमासपूर्वं हस्तिनापुराधीशः मृगयाविहारी सम्राट् दुष्यन्तः महर्षेः अनुपस्थितौ तपोवनम् आगतः। स तत्र कतिपयदिवसान् अतिष्ठत्। अतिथिसत्काराय नियुक्ता शकुन्तला स्वसखीभिः सह तं पर्यचरत्। तेन वञ्चकेन न महर्षिः पृष्टः न च गौतमी, स्वयमेव गान्धर्व-विधिना शकुन्तला व्यूढा। शीघ्रमेव त्वां हस्तिनापुरम् आनेतुं राजपुरुषं प्रेषयिष्यामि इति कथयित्वा सः स्वराजधानीं गतः परं कमपि नहि प्रेषितवान्।



# राष्ट्रिय-संस्कृत-संस्थानम्

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी,
नई दिल्ली-110058